# શ્રીગણેશસ્તોત્રમ્

shrIgaNeshastotram

sanskritdocuments.org

April 21, 2018

# shrIgaNeshastotram

# શ્રીગણેશસ્તોત્રમ્

## Sanskrit Document Information

Text title : gaNeshastotram

File name : gaNeshastotramsankalita.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Jonathan Wiener wiener78 at sbcglobal.net

Proofread by : Jonathan Wiener wiener78 at sbcglobal.net, NA

Description-comments : Path Pustakam 1934 Srinagar Kashmir Mercantile Press

Latest update : April 22, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

April 21, 2018

*sanskritdocuments.org*

# શ્રીગણેશસ્તોત્રમ્

સઙ્કુલિત

શ્રીગણેશાય નમઃ ।

અથ ગણેશસ્તોત્રપ્રારમ્ભઃ ॥

ૐ બિભ્રદક્ષિણહસ્તપદ્મયુગલે દન્તાક્ષસૂત્રે શુભે
વામે મોદકપૂર્ણપાત્રપરશૂ નાગોપવીતી ત્રિદૃક્ ।
શ્રીમાન્સિંહયુગાસનઃ શ્રુતિયુગે શઙ્ખૌ વહન્મૌલિમાન્
દિશ્યાદીશ્વરપુત્ર એષ ભગવાઁલ્લમ્બોદરઃ શર્મ નઃ ॥ ૧॥

ગણાનામધિપશ્ચણ્ડો ગજવક્ત્રસ્ત્રિલોચનઃ ।
પ્રસન્નો ભવતાં નિત્યં વર દાતા વિનાયકઃ ॥ ૨॥

સુમુખશ્ચૈકદન્તશ્ચ કપિલો ગજકર્ણકઃ ।
લમ્બોદરશ્ચ વિકટો વિઘ્નરાજો ગણાધિપઃ ॥ ૩॥

ધૂમ્રકેતુર્ગણાધ્યક્ષો ભાલચન્દ્રો ગજાનનઃ ।
દ્વાદશૈતાનિ નામાનિ ગણેશસ્ય મહાત્મનઃ ॥ ૪॥

યઃ પઠેચ્છૃણુયાદ્વાપિ સર્વવિઘ્નહરાણિ વૈ ।
વિદ્યારમ્ભે વિવાહે ચ પ્રવેશે નિર્ગમે તથા ॥ ૫॥

સઙ્ગ્રામે સઙ્કટે ચૈવ વિઘ્નસ્તસ્ય ન જાયતે ।
મુખ્યદ્વાદશ નામાનિ ગણેશસ્ય સમાહિતઃ ॥ ૬॥

યઃ પઠેત્તુ શિવોક્તાનિ સ લભેત્સિદ્ધિમુત્તમામ્ ।
પ્રથમં વક્રતુણ્ડં તુ ચૈકદન્તં દ્વિતીયકમ્ ॥ ૭॥

તૃતીયં કૃષ્ણપિઙ્ગં તુ ચતુર્થં તુ કપર્દિનમ્ ।
લમ્બોદરં પઞ્ચમં તુ ષષ્ઠં વિકટમેવ ચ ॥ ૮॥

સપ્તમં વિઘ્નરાજેન્દ્રં ધૂમ્રવર્ણં તથાષ્ટમમ્ ।

નવમં ભાલચન્દ્રં તુ દશમં તુ વિનાયકમ્ ॥ ૯॥

એકાદશં ગણપતિં દ્વાદશં મન્ત્રનાયકમ્ ।
પઠતે શૃણુતે યસ્તુ ગણેશસ્તવમુત્તમમ્ ॥ ૧૦॥

વિદ્યાર્થી લભતે વિદ્યાં પુત્રાર્થી પુત્રમુત્તમમ્ ।
ભાર્યાર્થી લભતે ભાર્યાં મોક્ષાર્થી પરમં પદમ્ ॥ ૧૧॥

ઇતિ ગણેશસ્તોત્રમ્ ॥

Encoded and proofread by Jonathan Wiener wiener78 at sbcglobal.net

---

*shrIgaNeshastotram*
pdf was typeset on April 21, 2018

Please send corrections to *sanskrit@cheerful.com*